समवयस्का। तत्पर्य्यायः। आलिः २ वयस्या ३ सखी ४ सहचरी ५। इति जटाधरः॥

सवयाः, [स्] पुं, (समानं वयो यस्य।) वयस्यः। इत्यमरः। २। ८। १२॥ समानवयस्के, त्रि॥ (यथा रघुः। ५। ६५।

"सूतात्मजाः सवयसः प्रथितप्रबोधं
प्राबोधयन्नुषसि वाग्भिरुदारवाचः॥")

सवरः, पुं, सलिलम्। शिवः। इति त्रिकाण्डशेषः॥

सवर्णः, त्रि, (समानो वर्णोऽस्य। "ज्योतिर्जन-पदेति।" ६। ३। ८५। इति समानस्य सः।) सदृशः। इति हेमचन्द्रः॥ (यथा, रघुः।६।५९।

"ग्रथितमौलिरसौ वनमालया
तरुपलाशसवर्णतनुच्छदः॥")

समानवर्णः। (यथा, महाभारते।७।२२।४३।

"इन्द्रायुधसवर्णैस्तु कुन्तिभोजो हयोत्तमैः।
आयात् सदश्वैः पुरुजित् मातुलः सव्यसाचिनः॥")

तुल्यजातिः। यथा, मनुः।

"पाणिग्रहणसंस्कारः सवर्णासूपदिश्यते।
असवर्णास्वयं ज्ञेयो विधिरुद्वाहकर्म्मणि॥"

इत्युद्वाहतत्त्वम्॥

एकस्थानोत्पन्नवर्णः। यथा। सवर्णेनाकदीर्घः। इति संक्षिप्तसारव्याकरणम्॥

सवर्णा, स्त्री, (समानो वर्णो यस्याः।) सूर्य्यपत्नी छाया। इति शब्दरत्नावली॥ (समानवर्णा स्त्री। यथा, मनुः। ३। ४।

"उद्वहेत द्विजो भार्य्यां सवर्णां लक्षणान्वि-
ताम्॥")

सवहा, स्त्री, त्रिवृता। इत्यमरटीकायां भरतः॥

सविकाशः, त्रि, विकशितः। प्रफुल्लः। विकाशेन सह वर्त्तमानः॥

सविता, [ऋ] पुं, (सूते लोकादीनिति। सू+तृच्।) सूर्य्यः। इत्यमरः।१।३।३१॥ (यथा, कुमारे। ५। २०।

"विजित्य नेत्रप्रतिघातिनीं प्रभा-
मनन्यदृष्टिः सवितारमैक्षत॥")

तस्य व्युत्पत्तिर्यथा,—

"धीशब्दवाच्यो ब्रह्माणं प्रचोदयति सर्व्वदा।
स्रष्टार्थं भगवान् विष्णुः सविता स तु कीर्त्तितः॥
सर्व्वलोकप्रसवनात् सविता स तु कीर्त्त्यते।
यतस्तद्देवता देवी सावित्रीत्युच्यते ततः॥"

इति वह्निपुराणे गायत्त्रीकल्पो नामाध्यायः॥

अर्कवृक्षः। इति चामरः। २। ४। ८०॥

सवितृदैवतः, पुं, (सविता दैवतं यस्य।) हस्तनक्षत्रम्। इति हेमचन्द्रः॥

सवितृलः, त्रि, सवितृसम्बन्धी। सवितृशब्दात् लप्रत्ययेन निष्पन्नः॥

सवित्रं, क्ली, (सूयतेऽनेनेति। सू प्रसवे+"अर्त्ति-लूधूसूखनसहचर इत्रः।" ३।२।१८४। इति करणे इत्रः।) प्रसवकरणम्। इति मुग्धबोधव्याकरणम्॥

सवित्रियः, त्रि, (सवितुरयमिति। सवितृ+घः।) सूर्य्यसम्बन्धीयः। इति सिद्धान्तकौमुदी॥

सवित्री, स्त्री, (सूते या। सू+तृच्। ङीप्।) माता। इति हेमचन्द्रः॥ (यथा, कुमारे।१।२४।

"तया दुहित्रा सुतरां सवित्री
स्फुरत्प्रभामण्डलया चकाशे॥")

गौः। इति केचित्॥

सविधः, त्रि, (समाना विधास्येति।) निकटम्। इत्यमरः। ३। १। ६७॥ (यथा, कथासरित्-सागरे। ५३। ३०।

"अथ सविधमागत्य राज्ञस्तस्योपविष्टवान्॥")

समानप्रकारश्च॥ (यथा, भागवते।३।३।८।

"आर्सां मुहूर्त्त एकस्मिन् नानागारेषु योषिताम्।
सविधं जगृहे पाणीननुरूपः स्वमायया॥")

सविस्मयः, त्रि, (विस्मयेन सह वर्त्तमानः।) विस्मयापन्नः। तत्पर्य्यायः। वीक्षापन्नः २। इति हारावली॥

सवेशः, त्रि, (वेशेन सह वर्त्तमानः।) वेशान्वितः। इति धरणिः॥ निकटम्। इत्यमरः।३।१।६७॥

सव्यः, त्रि, (सू प्रेरणे+"माच्छाससिसूभ्यो यः।" उणा० ४। १०६। इति यः।) वामः। इत्य-मरः। ३। १। ८५॥ (यथा, मनुः। २। ६३।

"उद्धृते दक्षिणे पाणावुपवीत्युच्यते द्विजः।
सव्ये प्राचीन आवीती निवीती कण्ठसज्जने॥")

दक्षिणः। (यथा, अनर्घराघवे। ६। ७०।

"एकेन सव्यपाणिना विशिखसुतृखाय किमाह
रावणः। साधु रे मनुष्यडिम्भ साधु।"
"सव्यपाणिना दक्षिणहस्तेन।" इति तट्टीका॥)

प्रतिकूलः। इति हेमचन्द्रः॥

सव्यः, पुं, (सूते विश्वमिति। सू प्रसवे+"माच्छा-ससिसूभ्यो यः।" उणा० ४। १०६। इति यः।) विष्णुः। इति शब्दमाला॥

सव्यसाची, [न्] पुं, (सव्येन वामेन हस्तेनापि सचति सन्दधाति बाणमिति। सच सन्धाने+णिनिः।) अर्ज्जुनः। इति हेमचन्द्रः॥ (यथा, महाभारते। ४। १२। १६।

"उभौ मे दक्षिणौ पाणी गाण्डीवस्य विकर्षणे।
तेन देवमनुष्येषु सव्यसाचीति मां विदुः॥")

सव्येष्ठः, पुं, (सव्ये तिष्ठतीति। स्था+कः। "स्थास्थिन्स्थॄणाम्।" ८। ३। ९७। इत्यस्य वार्त्तिकोक्त्या षत्वम्। हलदन्तादित्यलुक्।) सारथिः। इति हलायुधः॥

सव्येष्ठा, [ऋ] पुं, (सव्ये तिष्ठतीति। स्था+"सव्ये स्थश्छन्दसि।" उणा० २। १०२। इति छन्दसि ऋः। स च ङित्।"स्थास्थिन्स्थॄणाम्।" ८।३।९७। इति षत्वम्। सप्तम्या अलुक्।) सारथिः। इत्यमरः। २। ८। ६०॥

सशल्या, स्त्री, (शल्येन सह वर्त्तमाना।) नागदन्ती। इति रत्नमाला॥ शल्ययुक्तभूम्यादौ, त्रि॥

सशूकः, पुं, (शूकेन दयया सह वर्त्तमानः।) आस्तिकः। इति केचित्॥

सश्मश्रुः, स्त्री, (श्मश्रुणा सह वर्त्तमाना।) श्मश्रुयुक्तस्त्री। तत्पर्य्यायः। नरमालिनी २। इति हेमचन्द्रः॥ (श्मश्रुविशिष्टे, त्रि॥)

ससत्त्वा, स्त्री, (सत्त्वेन सह वर्त्तमाना।) गर्भिणी। इति शब्दरत्नावली॥ (यथा, रघुः। ३। ९।

"नदीमिवान्तःसलिलां सरस्वतीं
नृपः ससत्त्वां महिषीममन्यत॥")

प्राणियुक्ते, त्रि। यथा, "मनुः। ४। ४७।
'न मूत्रं पथि कुर्व्वीत न भस्मनि न गोव्रजे॥'
'न ससत्त्वेषु गर्त्तेषु न गच्छन्नापि संस्थितः॥'
ससत्त्वेषु प्राणिमत्सु।" इत्याह्निकतत्त्वम्॥

सस, क्ली, (सस नाशे+ल्युट्।) यज्ञार्थपशु-हननम्। इत्यमरटीका। २। ७। २६॥ तस्य रूपान्तरं शमनं शसनञ्च॥

सस्मितः, त्रि, (स्मितेन सह वर्त्तमानः।) ईषद्धास्ययुक्तः। यथा,—

"सस्मिताननसरोजमङ्गने
रिङ्गमाणमतिलोलकुन्तलम्।
रोचनोल्लसितभालमस्तु मे
कैशवं मनसि शैशवं वपुः॥"

इत्यनुमितौ जगदीशः॥

सस्यं, क्ली, (सस स्वप्ने+"माच्छाससिसूभ्यो यः।" उणा० ४। १०६। इति यः।) वृक्षादीनां फलम्। यथा,—

"स्रंसनं सीसकं सस्यं सस्तं सारुश्च साध्व-
सम्॥"

इत्युष्मविवेकात्। इत्यमरटीकायां भरतः॥

धान्यम्। यथा, हेमचन्द्रः।

"धान्यन्तु सस्यं सीत्यञ्च व्रीहिस्तम्बकरिश्च तत्।"

शस्त्रम्। गुणः। इति विश्वः॥ तस्य प्रशंसा यथा,

"जीर्णमन्नं प्रशंसीयात् भार्य्याञ्च गतयौवनाम्।
रणात् प्रत्यागतं शूरं सस्यञ्च गृहमागतम्॥"

इति चाणक्यशतकम्॥

अन्यत् शस्यशब्दे द्रष्टव्यम्॥

सस्यकः, पुं, (सस्येन गुणेन परिजातः सम्बद्धः। सस्य+"सस्येन परिजातः।" ५। २। ६८। इति कन्।) मणिभेदः। (यथा, वृहत्संहितायाम्। ७। २०।

"हेमकान्तिरथवा शुकवर्णः
सस्यकेन मणिना सदृशो वा॥")

असिः। इति मेदिनी॥

"सस्यको नालिकेरान्तःसस्याभमणिखड्गयोः॥"

इति हेमचन्द्रः॥

(शालिः। साधुः। इति काशिका॥)

सस्यमारी, [न्] पुं, (सस्यं मारयतीति। मृ+णिच्+णिनिः।) महामूषकः। इति राजनिर्घण्टः॥ सस्यनाशके, त्रि॥

सस्यसंवरः, पुं, (सस्यैः संव्रियते इति। सं+वृ+"ग्रहवृदृनिश्चिगमश्च।"३।३।५८। इति अप्।) सालवृक्षः। इत्यमरः। २। ४। ४४॥

सस्यसंवरणः, पुं, (सस्यैः संवरणमस्येति।) अश्वकर्णवृक्षः। इति राजनिर्घण्टः॥

सस्वेदा, स्त्री, (स्वेदेन सह वर्त्तमाना।) दूषिता कन्या। इति शब्दरत्नावली॥ (घर्म्मविशिष्टे, त्रि॥)